फलषाड़व:, पुं, दाड़िम:। इति त्रिकाण्डशेष:॥

फलशाली [न्] त्रि, (फलेन शालते श्लाघते इति। शाल्+णिनि:।) फलाश्रय:। यथा,—
"परसमवेतधात्वर्थजन्यफलशालित्वं कर्म्मत्वम्॥"
इति कर्म्मलक्षणे सारमञ्जरी॥

फलशैशिर:, पुं, (शिशिरं प्राप्तमस्य अण् शैशिरम्। फलं शैशिरं यस्य।) वदरवृक्ष:। इति राजनिर्घण्ट:॥

फलश्रुति:, स्त्री, (फलस्य कर्म्मफलस्य श्रुति: श्रवणम्।) कर्म्मफलश्रवणम्। यथा,—
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्॥"
अपि च।
"वेदोक्तमेव कुर्व्वाणो नि:सङ्गोऽर्पितमीश्वरे।
नैष्कर्म्म्यं लभते सिद्धिं रोचनार्था फलश्रुति:॥"
इति श्रीभागवते ११ स्कन्ध:। इति मलमासतत्त्वम्॥

फलश्रेष्ठ:, पुं, (फलानां फलवृक्षाणां श्रेष्ठ:।) आम्रवृक्ष:। इति शब्दचन्द्रिका॥

फलस:, पुं, पनसवृक्ष:। इत्यमरटीकायां भरत:॥

फलस्नेह:, पुं, (फले स्नेहो यस्य।) आखोटवृक्ष:। इति राजनिर्घण्ट:॥

फलहारी, स्त्री, काली। फलं हरति या ढात् प्रक्षिति कर्म्मोपपदहृञ् धातो: णिनि ईप्प्रत्ययनिष्पन्नोऽयं शब्द:। सा ज्यैष्ठपञ्चदश्यां बहुफलाद्युपहारै: पूजनीया। यथा,—
"ज्यैष्ठे मासि अमायां वै मध्यरात्रे महेश्वरि!।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकै:॥
तत्रैव सितपक्षे तु पञ्चदश्यां निशार्द्धके।
पूजयेच्च फलैर्नैवै: शक्तितो वापि कालिकाम्॥"
इति मायातन्त्रे १७ पटल:॥

फला, स्त्री, झिञ्झिरिटाक्षुप:। इति राजनिर्घण्ट:॥ (शमी। तत्पर्य्यायो यथा,—
"शमी शक्तुफला तुङ्गा केशहन्त्री फलाशिवा।
मङ्गल्या च तथा लक्ष्मी: शमीर: साविका स्मृता॥")

फलाढ्या, स्त्री, (फलेन आढ्या सम्पन्ना।) काष्ठकदली। इति राजनिर्घण्ट:॥

फलाध्यक्षं, क्ली, (फलानामध्यक्षमिव।) राजादनवृक्ष:। इत्यमर:। २।४।४५॥ (क्वचित्, पुं। अस्य पर्य्याय:।
"राजादन: फलाध्यक्षो राजन्य: क्षीरिकापि च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
फलानामधिकृते, त्रि॥

फलादन:, पुं, (फलानामदनोभक्षक:। यद्वा, फलानां अदनं भक्षणं यस्य।) शुकपक्षी। इति हेमचन्द्र:। ४।४०१॥ फलभक्षके, त्रि॥

फलान्त:, पुं, (फलेषु सत्सु अन्तो नाशो यस्य।) वंश:। इति शब्दमाला॥

फलाम्लं, क्ली, (फलमम्लं यस्य।) वृक्षाम्लम्। इति राजनिर्घण्ट:॥ (यथा, सुश्रुते सूत्रस्थाने ४६अ॥
"मद्यं मद्योचितानान्तु सर्व्वमांसेषु पूजितम्।
अमद्यपानामुदकं फलाम्लं वा प्रशस्यते॥")

फलाम्ल:, पुं, (फलमम्लमस्य।) अम्लवेतस:॥ इति राजनिर्घण्ट:॥

फलार्थी [न्] त्रि, (फलं अर्थयते इति। अर्थ+णिनि:।) फलकामी। यथा,—
"सर्व्वस्वेतेषु कर्त्तव्या प्रतिष्ठा विधिना बुधै:।
फलार्थिभिस्त्वप्रतिष्ठं यस्मान्निष्फलमुच्यते॥"
इति मठप्रतिष्ठातत्त्वधृतहयशीर्षपञ्चरात्रीयसङ्कर्षणकाण्डीयवचनम्॥

फलाशन:, पुं, (फलानश्नातीति। अश्+ल्यु:।) शुकपक्षी। इति त्रिकाण्डशेष:॥ फलभक्षके, त्रि॥

फलासङ्ग:, पुं, (फलेषु आसङ्ग:।) फलासक्ति:॥ यथा,—
"त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रय:।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति स:॥"
इति श्रीभगवद्गीतायां ४ अध्याय:॥

फलि:, पु, (फल+इन्।) मत्स्यविशेष:। फलुइ इति भाषा। अस्य गुणा:। स्वादुत्वम्। शुक्रत्वम्। स्निग्धत्वम्। बलकारित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभ:॥

फलिका, स्त्री, (फलमस्या अस्तीति। फल+ठन्। टाप्।) निष्पावी। इति राजनिर्घण्ट:॥ (फला स्वार्थे कनि अत इत्वम्। शरादेरग्रभाग:। यथा, आर्य्यासप्तशत्याम्। ३३५।
"न प्राप्यसे कराभ्यां हृदयाग्रान्नैषि वितनुषे बाधाम्।
त्वं मम भग्नावस्थितकुसुमायुधविशिखफलिकेव॥")

फलितं, त्रि, (फल+तारकादित्वात् इतच्।) फलमस्य जातम्। इति मुग्धबोधव्याकरणम्॥ (यथा, देवीभागवते। १। १७। १२।
"संपश्यन् विविधान् देशान् लोकांश्च वित्तधर्म्मिण:।
वनानि पादपांश्चैव क्षेत्राणि फलितानि च॥")
वृक्षे, पुं। इति धरणि:॥ शैलेये, क्ली। इति राजनिर्घण्ट:॥

फलिन:, त्रि, (फलानि सन्त्यस्येति। फल+"बहुलमन्यत्रापि।" उणा० २। ४९। इति इनच्।) फलवान्। इत्यमर:। २। ४। ७॥ पनसे फलवति वृक्षे च पुं। इति राजनिर्घण्ट:॥

फलिनी, स्त्री, (फलमस्या अस्तीति। इनि:। ङीप्।) प्रियङ्गुवृक्ष:॥ (पर्य्यायोऽस्या यथा,—
"प्रियङ्गु: फलिनी कान्ता लता च महिलाह्वया।
गुन्द्रा गुन्द्रफला श्यामा विष्वक्सेनाङ्गना प्रिया॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ यथा, रघौ। ८। ६१।
"मिथुनं परिकल्पितं त्वया
सहकार: फलिनी च नन्विमौ।
अविधाय विवाहसत्क्रिया-
मनयो र्गम्यत इत्यसाम्प्रतम्॥")
अग्निशिखावृक्ष:। इत्यमर:। २। ४। १३६॥

फली, [न्] त्रि, (फलमस्यास्तीति। फल+इनि:।) फलयुक्तवृक्षादि:। इत्यमर:। २। ४। ७॥

फली, स्त्री, (फलमस्त्यस्या इति अर्श आदित्वात् अच्। स्त्रियां ङीप्।) प्रियङ्गुवृक्ष:। इत्यमर:। २। ४। ७॥ (यथा, वैद्यकरत्नमालायाम्।
"विश्वक्सेना प्रिया कान्ता प्रियङ्गु: फलिनी फली॥"
फलि+वा ङीष्।) फलिमत्स्य:। इति शब्दमाला॥

फलूष:, पुं, लताभेद:। इत्युणादिकोष:॥

फलेग्रहि:, पुं, (फलं गृह्णातीति। फल+ग्रह+"फलेग्रहिरात्मम्भरिश्च।" ३।२।२६। इति उपपदस्य एदन्तत्वं ग्रहेरिन् प्रत्ययश्च निपात्यते।) यथासमयं फलधरवृक्ष:। ऋतुप्राप्तौ फलानि गृह्णाति धारयतीति फलेग्रहि: शकृत्स्तम्बादित्वादिना इ: स्वं फले इति निर्द्देशात् एकार:। किंवा फले गृह्णाति इति फलेग्रहि: कर्म्मण्याधारविवक्षा निपातनात् सप्तम्या अलुक् लुकि फलग्रहिश्च फलेग्रहि: फलग्रहिरिति वाचस्पति:। इह ग्रहिर्धारणार्थ: स्वीकारार्थश्च अत्र धारणार्थे वृक्ष एव रूढि:। स्वीकारार्थे तु क्रियाशब्दत्वेन यथा फलेग्रहीन् हंसि वनस्पतीनामिति भट्टि:॥ इति रायमुकुटादय:। इत्यमरटीकायां भरत:॥ फलग्रहणकर्त्तरि, त्रि॥

फलेग्राहि:, पुं, (फले गृह्णातीति। ग्रह+इन्। पृषोदरात् वृद्धि:। निपातनात् सप्तम्या अलुक्।) फलेग्रहि:। इति शब्दरत्नावली॥

फलेन्द्र:, पुं, (फलेन इन्द्र: ऐश्वर्य्यशालीव। इन्द्रत्-फलत्वादेवास्य तथात्वम्।) इन्द्रजम्बु:। तत्पर्य्याय:। नन्द: २ राजजम्बु: ३ महाफला ४ सुरभिपत्रा ५ महाजम्बु: ६। अस्य गुणा:। स्वादुत्वम्। विष्टम्भित्वम्। गुरुत्वम्। रोचनत्वञ्च। इति भावप्रकाश:॥

फलेपुष्पा, स्त्री, (फले फलसुखे पुष्पं यस्या:। सप्तम्या अलुक्।) क्षुद्रक्षुपविशेष:। गूमा इति हिन्दीभाषा। तत्पर्य्याय:। द्रोणा २ द्रोणपुष्पी ३। अस्या गुणा:। गुरुत्वम्। स्वादुत्वम्। रूक्षत्वम्। उष्णत्वम्। वातपित्तकारित्वम्। क्षारत्वम्। लवणत्वम्। स्वादुपाकत्वम्। कटुत्वम्। भेदकत्वम्। कफामकामलाशोथतमकश्वासजन्तुनाशित्वञ्च। इति भावप्रकाश:॥

फलेरुहा, स्त्री, (फले रोहतीति। रुह+क:। सप्तम्या अलुक्।) पाटलिवृक्ष:। इत्यमर:। २। ४। ५४॥ (अस्या: पर्य्यायो यथा,—
"पाटलालिप्रिया स्थाली ताम्रपुष्पी फलेरुहा।
कामदूती कुवेराक्षी कुम्भी तोयाधिवासिनी॥"
इति वैद्यकरत्नमालायाम्॥)

फलेसक्त:, त्रि, (फले सक्त आसक्त:।) फलासक्त:। फलकामी। यथा, भगवद्गीतायाम्।
"युक्त: कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्॥
अयुक्त: कामकारेण फलेसक्तो निबध्यते॥"